# শ্রীচতুর্বিংশত্যবতারস্তোত্রম্ ৩

{॥ শ্রীচতুর্বিংশত্যবতারস্তোত্রম্ ৩ ॥}

ভাগবতপুরাণান্তর্গতম্ সর্গ ২ অধ্যায় ৭

ব্রহ্মোবাচ ।

যত্রোদ্যতঃ ক্ষিতিতলোদ্ধরণায বিভ্রত্

ক্রৌডীং তনুং সকলযজ্ঞমযীমনন্তঃ ।

অন্তর্মহার্ণব উপাগতমাদিদৈত্যং

তং দংষ্ট্রযাদ্রিমিব বজ্রধরো দদার ॥ ১॥

জাতো রুচেরজনযৎসুযমান্সুযজ্ঞ

আকূতিসূনুরমরানথ দক্ষিণাযাম্ ।

লোকত্রযস্য মহতীমহরদ্যদার্তিং

স্বাযম্ভুবেন মনুনা হরিরিত্যনূক্তঃ ॥ ২॥

জজ্ঞে চ কর্দমগৃহে দ্বিজ দেবহূত্যাং

স্ত্রীভিঃ সমং নবভিরাত্মগতিং স্বমাত্রে ।

ঊচে যযাত্মশমলং গুণসঙ্গপঙ্কং

অস্মিন্বিধূয কপিলস্য গতিং প্রপেদে ॥ ৩॥

অত্রেরপত্যমভিকাঙ্ক্ষত আহ তুষ্টো

দত্তো মযাহমিতি যদ্ভগবান্স দত্তঃ ।

যৎপাদপঙ্কজপরাগপবিত্রদেহা

যোগর্দ্ধিমাপুরুভযীং যদুহৈহযাদ্যাঃ ॥ ৪॥

তপ্তং তপো বিবিধলোকসিসৃক্ষযা মে

আদৌ সনাৎস্বতপসঃ স চতুঃসনোঽভূৎ ।

প্রাক্কল্পসম্প্লববিনষ্টমিহাত্মতত্ত্বং

সম্যগ্জগাদ মুনযো যদচক্ষতাত্মন্ ॥ ৫॥

ধর্মস্য দক্ষদুহিতর্যজনিষ্ট মূর্ত্যাং

নারাযণো নর ইতি স্বতপঃপ্রভাবঃ ।

দৃষ্ট্বাত্মনো ভগবতো নিযমাবলোপং

দেব্যস্ত্বনঙ্গপৃতনা ঘটিতুং ন শেকুঃ ॥ ৬॥

কামং দহন্তি কৃতিনো ননু রোষদৃষ্ট্যা

রোষং দহন্তমুত তে ন দহন্ত্যসহ্যম্ ।

সোঽযং যদন্তরমলং প্রবিশন্বিভেতি

কামঃ কথং নু পুনরস্য মনঃ শ্রযেত ॥ ৭॥

বিদ্ধঃ সপত্ন্যুদিতপত্রিভিরন্তি রাজ্ঞো

বালোঽপি সন্নুপগতস্তপসে বনানি ।

তস্মা অদাদ্ধ্রুবগতিং গৃণতে প্রসন্নো

দিব্যাঃ স্তুবন্তি মুনযো যদুপর্যধস্তাৎ ॥ ৮॥

যদ্বেনমুৎপথগতং দ্বিজবাক্যবজ্র-

নিষ্প্লুষ্টপৌরুষভগং নিরয়ে পতন্তম্ ।

ত্রাত্বার্থিতো জগতি পুত্রপদং চ লেভে

দুগ্ধা বসূনি বসুধা সকলানি যেন ॥ ৯॥

নাভেরসাবৃষভ আস সুদেবিসূনুর্-

যো বৈ চচার সমদৃগ্জডযোগচর্যাম্ ।

যৎপারমহংস্যমৃষয়ঃ পদমামনন্তি

স্বস্থঃ প্রশান্তকরণঃ পরিমুক্তসঙ্গঃ ॥ ১০॥

সত্রে মমাস ভগবান্হয়শীরষাথো

সাক্ষাৎস যজ্ঞপুরুষস্তপনীয়বর্ণঃ ।

ছন্দোময়ো মখময়োঽখিলদেবতাত্মা

বাচো বভূবুরুশতীঃ শ্বসতোঽস্য নস্তঃ ॥ ১১॥

মৎস্যো যুগান্তসময়ে মনুনোপলব্ধঃ

ক্ষোণীময়ো নিখিলজীবনিকায়কেতঃ ।

বিস্রংসিতানুরুভয়ে সলিলে মুখান্মে

আদায় তত্র বিজহার হ বেদমার্গান্ ॥ ১২॥

ক্ষীরোদধাবমরদানবযূথপানাং

উন্মথ্নতামমৃতলব্ধয় আদিদেবঃ ।

পৃষ্ঠেন কচ্ছপবপুর্বিদধার গোত্রং

নিদ্রাক্ষণোঽদ্রিপরিবর্তকষাণকণ্ডূঃ ॥ ১৩॥

ত্রৈপিষ্টপোরুভযহা স নৃসিংহরূপং

কৃত্বা ভ্রমদ্ভ্রুকুটিদংষ্ট্রকরালবক্ত্রম্ ।

দৈত্যেন্দ্রমাশু গদযাভিপতন্তমারাদ্-

ঊরৌ নিপাত্য বিদদার নখৈঃ স্ফুরন্তম্ ॥ ১৪॥

অন্তঃসরস্যুরুবলেন পদে গৃহীতো

গ্রাহেণ যূথপতিরম্বুজহস্ত আর্তঃ ।

আহেদমাদিপুরুষাখিললোকনাথ

তীর্থশ্রবঃ শ্রবণমঙ্গলনামধেয ॥ ১৫॥

শ্রুত্বা হরিস্তমরণার্থিনমপ্রমেযশ্-

চক্রাযুধঃ পতগরাজভুজাধিরূঢঃ ।

চক্রেণ নক্রবদনং বিনিপাট্য তস্মাদ্-

ধস্তে প্রগৃহ্য ভগবান্কৃপযোজ্জহার ॥ ১৬॥

জ্যাযান্গুণৈরবরজোঽপ্যদিতেঃ সুতানাং

লোকান্বিচক্রম ইমান্যদথাধিযজ্ঞঃ ।

ক্ষ্মাং বামনেন জগৃহে ত্রিপদচ্ছলেন

যাচ্ঞামৃতে পথি চরন্প্রভুভির্ন চাল্যঃ ॥ ১৭॥

নার্থো বলেরযমুরুক্রমপাদশৌচং
আপঃ শিখাধৃতবতো বিবুধাধিপত্যম্ ।
যো বৈ প্রতিশ্রুতমৃতে ন চিকীর্ষদন্যদ্-
আত্মানমঙ্গ মনসা হরয়েঽভিমেনে ॥ ১৮॥

তুভ্যং চ নারদ ভৃশং ভগবান্বিবৃদ্ধ-
ভাবেন সাধু পরিতুষ্ট উবাচ যোগম্ ।
জ্ঞানং চ ভাগবতমাত্মসতত্ত্বদীপং
যদ্বাসুদেবশরণা বিদুরঞ্জসৈব ॥ ১৯॥

চক্রং চ দিক্ষ্ববিহতং দশসু স্বতেজো
মন্বন্তরেষু মনুবংশধরো বিভর্তি ।
দুষ্টেষু রাজসু দমং ব্যদধাৎস্বকীর্তিং
সত্যে ত্রিপৃষ্ঠ উশতীং প্রথযংশ্চরিত্রৈঃ ॥ ২০॥

ধন্বন্তরিশ্চ ভগবান্স্বযমেব কীর্তির্-
নাম্না নৃণাং পুরুরুজাং রুজ আশু হন্তি ।
যজ্ঞে চ ভাগমমৃতাযুরবাবরুন্ধ
আযুষ্যবেদমনুশাস্ত্যবতীর্য লোকে ॥ ২১॥

ক্ষত্রং ক্ষযায বিধিনোপভৃতং মহাত্মা
ব্রহ্মধ্রুগুজ্ঝিতপথং নরকার্তিলিপ্সু ।

উদ্ধন্ত্যসাববনিকণ্টকমুগ্রবীর্যস্-
ত্রিঃসপ্তকৃত্ব উরুধারপরশ্বধেন ॥ ২২॥

অস্মৎপ্রসাদসুমুখঃ কলযা কলেশ
ইক্ষ্বাকুবংশ অবতীর্য গুরোর্নিদেশে ।
তিষ্ঠন্বনং সদযিতানুজ আবিবেশ
যস্মিন্বিরুধ্য দশকন্ধর আর্তিমার্চ্ছত্ ॥ ২৩॥

যস্মা অদাদুদধিরূঢভযাঙ্গবেপো
মার্গং সপদ্যরিপুরং হরবদ্দিধক্ষোঃ ।
দূরে সুহৃন্মথিতরোষসুশোণদৃষ্ট্যা
তাতপ্যমানমকরোরগনক্রচক্রঃ ॥ ২৪॥

বক্ষঃস্থলস্পর্শরুগ্ণমহেন্দ্রবাহ-
দন্তৈর্বিডম্বিতককুব্জুষ ঊঢহাসম্ ।
সদ্যোঽসুভিঃ সহ বিনেষ্যতি দারহর্তুর্-
বিস্ফূর্জিতৈর্ধনুষ উচ্চরতোঽধিসৈন্যে ॥ ২৫॥

ভূমেঃ সুরেতরবরূথবিমর্দিতাযাঃ
ক্লেশব্যযায কলযা সিতকৃষ্ণকেশঃ ।
জাতঃ করিষ্যতি জনানুপলক্ষ্যমার্গঃ
কর্মাণি চাত্মমহিমোপনিবন্ধনানি ॥ ২৬॥

তোকেন জীবহরণং যদুলূকিকাযাস্-
ত্রৈমাসিকস্য চ পদা শকটোঽপবৃত্তঃ ।
যদ্রিঙ্গতান্তরগতেন দিবিস্পৃশোর্বা
উন্মূলনং ত্বিতরথার্জুনযোর্ন ভাব্যম্ ॥ ২৭॥

যদ্বৈ ব্রজে ব্রজপশূন্বিষতোযপীতান্
পালাংস্ত্বজীবযদনুগ্রহদৃষ্টিবৃষ্ট্যা ।
তচ্ছুদ্ধযেঽতিবিষবীর্যবিলোলজিহ্বং
উচ্চাটযিষ্যদুরগং বিহরন্হ্রদিন্যাম্ ॥ ২৮॥

তৎকর্ম দিব্যমিব যন্নিশি নিঃশযানং
দাবাগ্নিনা শুচিবনে পরিদহ্যমানে ।
উন্নেষ্যতি ব্রজমতোঽবসিতান্তকালং
নেত্রে পিধাপ্য সবলোঽনধিগম্যবীর্যঃ ॥ ২৯॥

গৃহ্ণীত যদ্যদুপবন্ধমমুষ্য মাতা
শুল্বং সুতস্য ন তু তত্তদমুষ্য মাতি ।
যজ্জৃম্ভতোঽস্য বদনে ভুবনানি গোপী
সংবীক্ষ্য শঙ্কিতমনাঃ প্রতিবোধিতাঽঽসীত্ ॥ ৩০॥

নন্দং চ মোক্ষ্যতি ভযাদ্বরুণস্য পাশাদ্-
গোপান্বিলেষু পিহিতান্ময়সূনুনা চ ।

অহ্ন্যাপৃতং নিশি শযানমতিশ্রমেণ
লোকং বিকুণ্ঠমুপনেষ্যতি গোকুলং স্ম ॥ ৩১॥

গোপৈর্মখে প্রতিহতে ব্রজবিপ্লবায
দেবেঽভিবর্ষতি পশূন্কৃপযা রিরক্ষুঃ।
ধর্তোচ্ছিলীন্ধ্রমিব সপ্তদিনানি সপ্ত
বর্ষো মহীধ্রমনঘৈককরে সলীলম্ ॥ ৩২॥

ক্রীডন্বনে নিশি নিশাকররশ্মিগৌর্যাং
রাসোন্মুখঃ কলপদাযতমূর্চ্ছিতেন।
উদ্দীপিতস্মররুজাং ব্রজভৃদ্বধূনাং
হর্তুর্হরিষ্যতি শিরো ধনদানুগস্য ॥ ৩৩॥

যে চ প্রলম্বখরদর্দুরকেশ্যরিষ্ট-
মল্লেভকংসযবনাঃ কপিপৌণ্ড্রকাদ্যাঃ।
অন্যে চ শাল্বকুজবল্বলদন্তবক্র-
সপ্তোক্ষশম্বরবিদূরথরুক্মিমুখ্যাঃ ॥ ৩৪॥

যে বা মৃধে সমিতিশালিন আত্তচাপাঃ
কাম্বোজমৎস্যকুরুসৃঞ্জযকৈকযাদ্যাঃ।
যাস্যন্ত্যদর্শনমলং বলপার্থভীম-
ব্যাজাহ্বযেন হরিণা নিলযং তদীযম্ ॥ ৩৫॥

কালেন মীলিতধিযামবমৃশ্য নৃণাং

স্তোকাযুষাং স্বনিগমো বত দূরপারঃ ।

আবির্হিতস্ত্বনুযুগং স হি সত্যবত্যাং

বেদদ্রুমং বিটপশো বিভজিষ্যতি স্ম ॥ ৩৬॥

দেবদ্বিষাং নিগমবর্ত্মনি নিষ্ঠিতানাং

পূর্ভির্মযেন বিহিতাভিরদৃশ্যতূর্ভিঃ ।

লোকান্ঘ্নতাং মতিবিমোহমতিপ্রলোভং

বেষং বিধায বহু ভাষ্যত ঔপধর্ম্যম্ ॥ ৩৭॥

যর্হ্যালযেষ্বপি সতাং ন হরেঃ কথাঃ স্যুঃ

পাষণ্ডিনো দ্বিজজনা বৃষলা নৃদেবাঃ ।

স্বাহা স্বধা বষডিতি স্ম গিরো ন যত্র

শাস্তা ভবিষ্যতি কলের্ভগবান্যুগান্তে ॥ ৩৮॥

সর্গে তপোঽহমৃষযো নব যে প্রজেশাঃ

স্থানেঽথ ধর্মমখমন্বমরাবনীশাঃ ।

অন্তে ত্বধর্মহরমন্যুবশাসুরাদ্যা

মাযাবিভূতয ইমাঃ পুরুশক্তিভাজঃ ॥ ৩৯॥

বিষ্ণোর্নু বীর্যগণনাং কতমোঽর্হতীহ

যঃ পার্থিবান্যপি কবির্বিমমে রজাংসি ।

চঙ্কম্ভ যঃ স্বরহসাস্খলতা ত্রিপৃষ্ঠং

যস্মাত্রিসাম্যসদনাদুরুকম্পযানম্ ॥ ৪০॥

নান্তং বিদাম্যহমমী মুনযোঽগ্রজাস্তে

মাযাবলস্য পুরুষস্য কুতোঽবরা যে ।

গাযন্গুণান্দশশতানন আদিদেবঃ

শেষোঽধুনাপি সমবস্যতি নাস্য পারম্ ॥ ৪১॥

যেষাং স এষ ভগবান্দযযেদনন্তঃ

সর্বাত্মনাঽঽশ্রিতপদো যদি নির্ব্যলীকম্ ।

তে দুস্তরামতিতরন্তি চ দেবমাযাং

নৈষাং মমাহমিতি ধীঃ শ্বশৃগালভক্ষ্যে ॥ ৪২॥

বেদাহমঙ্গ পরমস্য হি যোগমাযাং

যূযং ভবশ্চ ভগবানথ দৈত্যবর্যঃ ।

পত্নী মনোঃ স চ মনুশ্চ তদাত্মজাশ্চ

প্রাচীনবর্হিরৃভুরঙ্গ উত ধ্রুবশ্চ ॥ ৪৩॥

ইক্ষ্বাকুরৈলমুচুকুন্দবিদেহগাধি-

রঘ্বম্বরীষসগরা গযনাহুষাদ্যাঃ ।

মান্ধাত্রলর্কশতধন্বনুরন্তিদেবা

দেবব্রতো বলিরমূর্ত্তরযো দিলীপঃ ॥ ৪৪॥

সৌভর্য্যুতঙ্কশিবিদেবলপিপ্পলাদ-

সারস্বতোদ্ধবপরাশরভূরিষেণাঃ ।

যেঽন্যে বিভীষণহনূমদুপেন্দ্রদত্ত-

পার্থার্ষ্টিষেণবিদুরশ্রুতদেববর্যাঃ ॥ ৪৫॥

তে বৈ বিদন্ত্যতিতরন্তি চ দেবমাযাং

স্ত্রীশূদ্রহূণশবরা অপি পাপজীবাঃ ।

যদ্যদ্ভুতক্রমপরাযণশীলশিক্ষাস্-

তির্যগ্জনা অপি কিমু শ্রুতধারণা যে ॥ ৪৬॥

শশ্বৎপ্রশান্তমভযং প্রতিবোধমাত্রং

শুদ্ধং সমং সদসতঃ পরমাত্মতত্ত্বম্ ।

শব্দো ন যত্র পুরুকারকবান্ক্রিযার্থো

মাযা পরৈত্যভিমুখে চ বিলজ্জমানা ॥ ৪৭॥

তদ্বৈ পদং ভগবতঃ পরমস্য পুংসো

ব্রহ্মেতি যদ্বিদুরজস্রসুখং বিশোকম্ ।

সধ্র্যঙ্নিযম্য যতযো যমকর্তহেতিং

জহ্যুঃ স্বরাডিব নিপানখনিত্রমিন্দ্রঃ ॥ ৪৮॥

স শ্রেযসামপি বিভুর্ভগবান্যতোঽস্য

ভাবস্বভাববিহিতস্য সতঃ প্রসিদ্ধিঃ ।

দেহে স্বধাতুবিগমেঽনুবিশীর্যমাণে

ব্যোমেব তত্র পুরুষো ন বিশীর্যতেঽজঃ ॥ ৪৯॥

সোঽযং তেঽভিহিতস্তাত ভগবান্বিশ্বভাবনঃ ।

সমাসেন হরের্নান্যদন্যস্মাৎসদসচ্চ যত্ ॥ ৫০॥

ইদং ভাগবতং নাম যন্মে ভগবতোদিতম্ ।

সঙ্গ্রহোঽযং বিভূতীনাং ত্বমেতদ্বিপুলী কুরু ॥ ৫১॥

যথা হরৌ ভগবতি নৃণাং ভক্তির্ভবিষ্যতি ।

সর্বাত্মন্যখিলাধারে ইতি সঙ্কল্প্য বর্ণয ॥ ৫২॥

মাযাং বর্ণযতোঽমুষ্য ঈশ্বরস্যানুমোদতঃ ।

শৃণ্বতঃ শ্রদ্ধযা নিত্যং মাযযাত্মা ন মুহ্যতি ॥ ৫৩॥

ইতি শ্রীমদ্ভাগবতে মহাপুরাণে পারমহংস্যাং সংহিতাযাং

দ্বিতীযস্কন্ধে ব্রহ্মনারদসংবাদে সপ্তমোঽধ্যাযঃ ॥

From Srimad Bhagavatam Canto-skandha 2 chapter-adhyAya 7

This stotram praises the 24 important incarnations

of Vishnu as described in Srimad Bhagavatam

Canto 1 chapter 3 with some variations.

Proofread by Psa Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ভ়oday

http://sanskritdocuments.org

Chaturvimshati Avatara Stotram 3 Lyrics in Bengali PDF
% File name : chaturviMshatyavatArastotram3.itx
% Category :
% Location : doc_vishhnu
% Author :
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by :
% Proofread by : Psa Easwaran psaeaswaran at gmail.com
% Translated by :
% Description/comments : dvitIyaskandhe brahmanAradasaMvAde saptamo.adhyAyaH
% Source :
% Acknowledge-Permission:
% Latest update : May 27, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 9, 2015 ] at Stotram Website